॥ वाल्मीकि रामायण॥

६ युद्धकाण्ड

अध्याय १७

तद्वचः पथ्यमक्लीबं सारणेनाभिभाषितम् ।
निशम्य रावणो राजा प्रत्यभाषत सारणम् ॥१॥

यदि मामभियुञ्जीरन्देवगन्धर्वदानवाः ।
नैव सीतां प्रदास्यामि सर्वलोकभयादपि ॥२॥

त्वं तु सौम्य परित्रस्तो हरिभिर्निर्जितो भृशम् ।
प्रतिप्रदानमद्यैव सीतायाः साधु मन्यसे ।
को हि नाम सपत्नो मां समरे जेतुमर्हति ॥३॥

इत्युक्त्वा परुषं वाक्यं रावणो राक्षसाधिपः ।
आरुरोह ततः श्रीमान्प्रासादं हिमपाण्डुरम् ।
बहुतालसमुत्सेधं रावणोऽथ दिदृक्षया ॥४॥

ताभ्यां चराभ्यां सहितो रावणः क्रोधमूर्छितः ।
पश्यमानः समुद्रं च पर्वतांश्च वनानि च ।
ददर्श पृथिवीदेशं सुसम्पूर्णं प्लवङ्गमैः ॥५॥

तदपारमसङ्ख्येयं वानराणां महद्बलम् ।
आलोक्य रावणो राजा परिपप्रच्छ सारणम् ॥६॥

एषां वानरमुख्यानां के शूराः के महाबलाः ।
के पूर्वमभिवर्तन्ते महोत्साहाः समन्ततः ॥७॥

केषां शृणोति सुग्रीवः के वा यूथपयूथपाः ।
सारणाचक्ष्व मे सर्वं के प्रधानाः प्लवङ्गमाः ॥८॥

सारणो राक्षसेन्द्रस्य वचनं परिपृच्छतः ।
आचचक्षेऽथ मुख्यज्ञो मुख्यांस्तांस्तु वनौकसः ॥९॥

एष योऽभिमुखो लङ्कां नर्दंस्तिष्ठति वानरः ।
यूथपानां सहस्राणां शतेन परिवारितः ॥१०॥

यस्य घोषेण महता सप्राकारा सतोरणा ।
लङ्का प्रवेपते सर्वा सशैलवनकानना ॥११॥

सर्वशाखामृगेन्द्रस्य सुग्रीवस्य महात्मनः ।
बलाग्रे तिष्ठते वीरो नीलो नामैष यूथपः ॥१२॥

बाहू प्रगृह्य यः पद्भ्यां महीं गच्छति वीर्यवान् ।
लङ्कामभिमुखः कोपादभीक्ष्णं च विजृम्भते ॥१३॥

गिरिशृङ्गप्रतीकाशः पद्मकिञ्जल्कसंनिभः ।
स्फोटयत्यभिसंरब्धो लाङ्गूलं च पुनः पुनः ॥१४॥

यस्य लाङ्गूलशब्देन स्वनन्तीव दिशो दश ।
एष वानरराजेन सुग्रीवेणाभिषेचितः ।
यौवराज्येऽङ्गदो नाम त्वामाह्वयति संयुगे ॥१५॥

ये तु विष्टभ्य गात्राणि क्ष्वेडयन्ति नदन्ति च ।
उत्थाय च विजृम्भन्ते क्रोधेन हरिपुङ्गवाः ॥१६॥

एते दुष्प्रसहा घोराश्चण्डाश्चण्डपराक्रमाः ।
अष्टौ शतसहस्राणि दशकोटिशतानि च ॥१७॥

य एनमनुगच्छन्ति वीराश्चन्दनवासिनः ।
एष आशंसते लङ्कां स्वेनानीकेन मर्दितुम् ॥१८॥

श्वेतो रजतसङ्काशः सबलो भीमविक्रमः ।
बुद्धिमान्वानरः शूरस्त्रिषु लोकेषु विश्रुतः ॥१९॥

तूर्णं सुग्रीवमागम्य पुनर्गच्छति वानरः ।
विभजन्वानरीं सेनामनीकानि प्रहर्षयन् ॥२०॥

यः पुरा गोमतीतीरे रम्यं पर्येति पर्वतम् ।
नाम्ना सङ्कोचनो नाम नानानगयुतो गिरिः ॥२१॥

तत्र राज्यं प्रशास्त्येष कुमुदो नाम यूथपः ।
योऽसौ शतसहस्राणां सहस्रं परिकर्षति ॥२२॥

यस्य वाला बहुव्यामा दीर्घलाङ्गूलमाश्रिताः ।
ताम्राः पीताः सिताः श्वेताः प्रकीर्णा घोरकर्मणः ॥२३॥

अदीनो रोषणश्चण्डः सङ्ग्राममभिकाङ्क्षति ।
एषैवाशंसते लङ्कां स्वेनानीकेन मर्दितुम् ॥२४॥

यस्त्वेष सिंहसङ्काशः कपिलो दीर्घकेसरः ।
निभृतः प्रेक्षते लङ्कां दिधक्षन्निव चक्षुषा ॥ २५ ॥

विन्ध्यं कृष्णगिरिं सह्यं पर्वतं च सुदर्शनम् ।
राजन्सततमध्यास्ते रम्भो नामैष यूथपः ॥ २६ ॥

शतं शतसहस्राणां त्रिंशच्च हरियूथपाः ।
परिवार्यानुगच्छन्ति लङ्कां मर्दितुमोजसा ॥ २७ ॥

यस्तु कर्णौ विवृणुते जृम्भते च पुनः पुनः ।
न च संविजते मृत्योर्न च यूथाद्विधावति ॥ २८ ॥

महाबलो वीतभयो रम्यं साल्वेय पर्वतम् ।
राजन्सततमध्यास्ते शरभो नाम यूथपः ॥ २९ ॥

एतस्य बलिनः सर्वे विहारा नाम यूथपाः ।
राजञ्शतसहस्राणि चत्वारिंशत्तथैव च ॥ ३० ॥

यस्तु मेघ इवाकाशं महानावृत्य तिष्ठति ।
मध्ये वानरवीराणां सुराणामिव वासवः ॥ ३१ ॥

भेरीणामिव संनादो यस्यैष श्रूयते महान् ।
घोरः शाखामृगेन्द्राणां सङ्ग्राममभिकाङ्क्षताम् ॥ ३२ ॥

एष पर्वतमध्यास्ते पारियात्रमनुत्तमम् ।
युद्धे दुष्प्रसहो नित्यं पनसो नाम यूथपः ॥ ३३ ॥

एनं शतसहस्राणां शतार्धं पर्युपासते ।
यूथपा यूथपश्रेष्ठं येषां यूथानि भागशः ॥ ३४ ॥

यस्तु भीमां प्रवल्गन्तीं चमूं तिष्ठति शोभयन् ।
स्थितां तीरे समुद्रस्य द्वितीय इव सागरः ॥ ३५ ॥

एष दर्दरसङ्काशो विनतो नाम यूथपः ।
पिबंश्चरति पर्णाशां नदीनामुत्तमां नदीम् ॥ ३६ ॥

षष्टिः शतसहस्राणि बलमस्य प्लवङ्गमाः ।
त्वामाह्वयति युद्धाय क्रथनो नाम यूथपः ॥ ३७ ॥

यस्तु गैरिकवर्णाभं वपुः पुष्यति वानरः ।
गवयो नाम तेजस्वी त्वां क्रोधादभिवर्तते ॥ ३८ ॥

एनं शतसहस्राणि सप्ततिः पर्युपासते ।
एष आशंसते लङ्कां स्वेनानीकेन मर्दितुम् ॥ ३९ ॥

एते दुष्प्रसहा घोरा बलिनः कामरूपिणः ।
यूथपा यूथपश्रेष्ठा येषां सङ्ख्या न विद्यते ॥ ४० ॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com